# सम्भाषणम् - (द्वितीयम्)

**श्रीक्षेत्रदर्शनम्**

रामः - कदा पुरीतः आगच्छः ?

माधवः - ह्यः सायंकाले आगच्छम् ।

रामः - भ्रमणं सुखकरमासीत् किम् ?

माधवः - आम्, सुखकरमासीत् । पञ्चमे दिनाङ्के प्रातः एव प्राप्तवान् । त्रीणि दिनानि स्थित्वा आगच्छम् ।

रामः - श्रीक्षेत्रे किं किमपश्यः ?

माधवः - तत्र श्रीमन्दिरमपश्यम् । मन्दिरे जगन्नाथं बलभद्रं चान्तरा सुभद्रा राजते । श्रीमन्दिरं परितः अनेकानि लघुमन्दिराणि सन्ति । तत्रापि देवाः पूजिताः भवन्ति । आनन्दविपण्यां महाप्रसादमपि अखादम् ।

रामः - सागरतीरं नागच्छः किम् ?

माधवः - तदपि अपश्यम् । सागरस्य दृश्यमतीव सुखप्रदम् । अनेके यात्रिणश्चापि तत्र आसन् । केचन सागरस्नानमकुर्वन् । वेलाभूमिः नितरां मनोहरा ।

रामः - गुण्डिचामन्दिरं नागच्छः वा ?

माधवः - आम्, श्रीमन्दिरतः गुण्डिचामन्दिरपर्यन्तं पद्भ्यामगच्छम् । प्रतिवर्षं श्रीजगन्नाथः बलभद्रः सुभद्रा सुदर्शनः च त्रिभिः रथैः राजमार्गे यात्रां कुर्वन्ति । या रथयात्रा नाम्ना विश्वप्रसिद्धा ।

रामः - श्रीक्षेत्रे अन्यत् किमपश्यः ?

माधवः - तत्र अनेकानि पुण्यस्थानानि सन्ति । तेषु लोकनाथ-गुण्डिचामन्दिर-नरेन्द्र-मणिकर्णिका-इन्द्रद्युम्नादीनि स्थानानि पवित्राणि । पञ्चतीर्थानि तु श्वेतगङ्गा-मार्कण्डेयं-रोहिणीकुण्डं-चर्क्रतीर्थं-महोदधिश्च ।

रामः - श्रीक्षेत्रे कानि प्रमुख-शिक्षानुष्ठानानि सन्ति ?

माधवः - श्रीक्षेत्रे श्रीजगन्नाथ-संस्कृत-विश्वविद्यालयः, सामन्तचन्द्रशेखरस्वयंशासितमहाविद्यालयः, राष्ट्रियसंस्कृतसंस्थानस्य सदाशिवपरिसरः, वेदकर्मकाण्डमहाविद्यालयः, नीलाचलचतुष्पाठी इत्यादीनि शिक्षानुष्ठानानि सन्ति । यत्र भारतवर्षस्य विभिन्नेभ्यः प्रान्तेभ्यः विद्यार्थिनः समागत्य अध्ययनं कुर्वन्ति ।